# श्री नारायण कवच

**न्यासः**

**अंगन्यासः**

ॐ ॐ पादयोः नमः ।

ॐ नं जानुनोः नमः ।

ॐ मों ऊर्वोः नमः ।

ॐ नां उदरे नमः ।

ॐ रां हृदि नमः ।

ॐ यं उरसि नमः ।

ॐ णां मुखे नमः ।

ॐ यं शिरसि नमः ।

**करन्यासः**

ॐ ॐ दक्षिणतर्जन्यां नमः ।

ॐ नं दक्षिणमध्यमायां नमः ।

ॐ मों दक्षिणानामिकायां नमः ।

ॐ भं दक्षिणकनिष्ठिकायां नमः ।

ॐ गं वामकनिष्ठिकायां नमः ।

ॐ वं वामानिकायां नमः ।

ॐ तें वाममध्यमायां नमः ।

ॐ वां वामतर्जन्यां नमः ।

ॐ सुं दक्षिणांगुष्ठोर्ध्वपर्वणि नमः ।

ॐ दें दक्षिणांगुष्ठाधः पर्वणि नमः ।

ॐ वां वामांगुष्ठोर्ध्वपर्वणि नमः ।

ॐ यं वामांगुष्ठाधः पर्वणि नमः ।

**विष्णुषडक्षरन्यासः**

ॐ ॐ हृदये नमः ।

ॐ विं मूर्ध्नै नमः ।

ॐ षं भ्रुर्वोर्मध्ये नमः ।

ॐ णं शिखायां नमः ।

ॐ वें नेत्रयोः नमः ।

ॐ नं सर्वसंधिषु नमः ।

ॐ मः प्राच्यां अस्त्राय फट् ।

ॐ मः आग्नेय्यां अस्त्राय फट् ।

ॐ मः दक्षिणस्यां अस्त्राय फट् ।

ॐ मः नैऋत्ये अस्त्राय फट् ।

ॐ मः प्रतीच्यां अस्त्राय फट् ।

ॐ मः वायव्ये अस्त्राय फट् ।

ॐ मः उदीच्यां अस्त्राय फट् ।

ॐ मः ऐशान्यां अस्त्राय फट् ।

ॐ मः ऊर्ध्वायां अस्त्राय फट् ।

ॐ मः अधरायां अस्त्राय फट् ।

**श्री हरिः**

अथ श्रीनारायणकवच

**॥राजोवाच॥**

यया गुप्तः सहस्त्राक्षः सवाहान् रिपुसैनिकान्।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम्॥1॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम्।
यथास्स्ततायिनः शत्रून् येन गुप्तोस्जयन्मृधे॥2॥

**॥श्रीशुक उवाच॥**

वृतः पुरोहितोस्त्वाष्ट्रो महेंद्रायानुपृच्छते।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु॥3॥

विश्वरूप उवाचधौतांघ्रिपाणिराचम्य सपवित्र उदङ् मुखः।
कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः॥4॥

नारायणमयं वर्म संनह्येद् भय आगते।
पादयोर्जानुनोरूर्वोरूदरे हृद्यथोरसि॥5॥

मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत्।
ॐ नमो नारायणायेति विपर्ययमथापि वा॥6॥

करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया।
प्रणवादियकारंतमंगुल्यंगुष्ठपर्वसु॥7॥

न्यसेद् हृदय ॐकारं विकारमनु मूर्धनि।
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत्॥8॥

वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु।
मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद् बुधः॥9॥

सविसर्गं फडंतं तत् सर्वदिक्षु विनिर्दिशेत्।
ॐ विष्णवे नम इति ॥10॥

आत्मानं परमं ध्यायेद ध्येयं षट्शक्तिभिर्युतम्।
विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत ॥11॥

ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे।
दरारिचर्मासिगदेषुचापाशान् दधानोस्ष्टगुणोस्ष्टबाहुः ॥12॥

जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरूणस्य पाशात्।
स्थलेषु मायावटुवामनोस्व्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥13॥

दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयुथपारिः।
विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥14॥

रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोस्व्याद् भरताग्रजोस्स्मान् ॥15॥

मामुग्रधर्मादखिलात् प्रमादान्नारायणः पातु नरश्च हासात्।
दत्तस्त्वयोगादथ योगनाथः पायाद् गुणेशः कपिलः कर्मबंधात् ॥16॥

सनत्कुमारो वतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात्।
देवर्षिवर्यः पुरूषार्चनांतरात् कूर्मो हरिर्मां निरयादशेषात् ॥17॥

धन्वंतरिर्भगवान् पात्वपथ्याद् द्वंद्वाद् भयादृषभो निर्जितात्मा।
यज्ञश्च लोकादवताज्जनांताद् बलो गणात् क्रोधवशादहींद्रः ॥18॥

द्वैपायनो भगवानप्रबोधाद् बुद्धस्तु पाखंडगणात् प्रमादात्।
कल्किः कले कालमलात् प्रपातु धर्मावनायोरूकृतावतारः ॥19॥

मां केशवो गदया प्रातरव्याद् गोविंद आसंगवमात्तवेणुः।
नारायण प्राह्णण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥20॥

देवोस्पराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम्।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोस्वतु पद्मनाभः ॥21॥

श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः।
दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥22॥

चक्रं युगांतानलतिग्मनेमि भ्रमत् समंताद् भगवत्प्रयुक्तम्।
दंदग्धि दंदग्ध्यरिसैन्यमासु कक्षं यथा वातसखो हुताशः ॥23॥

गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि।
कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥24॥

त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन्।
दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ॥25॥

त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि।
चर्मंछतचंद्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥26॥

यन्नो भयं ग्रहेभ्यो भूत् केतुभ्यो नृभ्य एव च।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥27॥

सर्वाण्येतानि भगन्नामरूपास्त्रकीर्तनात्।
प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः ॥28॥

गरूड्क्षो भगवान् स्तोत्रस्तोभश्छंदोमयः प्रभुः।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥29॥

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः।
बुद्धिंद्रियमनः प्राणान् पांतु पार्षदभूषणाः ॥30॥

यथा हि भगवानेव वस्तुतः सद्सच्च यत्।
सत्यनानेन नः सर्वे यांतु नाशमुपाद्रवाः ॥31॥

यथैकात्म्यानुभावानां विकल्परहितः स्वयम्।

भूषणायुद्धलिंगाख्या धत्ते शक्तीः स्वमायया ॥32॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥33

विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान् नारसिंहः।
प्रहापय~ंल्लोकभयं स्वनेन ग्रस्तसमस्ततेजाः ॥34॥

मघवन्निदमाख्यातं वर्म नारयणात्मकम्।
विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥35॥

एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥36॥

न कुतश्चित भयं तस्य विद्यां धारयतो भवेत्।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥37॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः।
योगधारणया स्वांगं जहौ स मरूधन्वनि ॥38॥

तस्योपरि विमानेन गंधर्वपतिरेकदा।
ययौ चित्ररथः स्त्रीर्भिवृतो यत्र द्विजक्षयः ॥39॥

गगनान्न्यपतत् सद्यः सविमानो ह्यवाक् शिराः।
स वालखिल्यवचनादस्थीन्यादाय विस्मितः।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥40॥

**॥श्रीशुक उवाच॥**

य इदं श्रृणुयात् काले यो धारयति चादृतः।
तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥41॥

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः।

त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्यऽमृधेसुरान् ॥42॥

**॥इति श्रीनारायणकवचं संपूर्णम्॥**

**— ( श्रीमद्भागवत स्कंध 6 )**

# Narayana Kavacham

### Nyāsaḥ

**Aṅganyāsaḥ**

ōṃ ōṃ pādayōḥ namaḥ ।

ōṃ naṃ jānunōḥ namaḥ ।

ōṃ mōṃ ūrvōḥ namaḥ ।

ōṃ nāṃ udarē namaḥ ।

ōṃ rāṃ hṛdi namaḥ ।

ōṃ yaṃ urasi namaḥ ।

ōṃ ṇāṃ mukhē namaḥ ।

ōṃ yaṃ śirasi namaḥ ।

**Karanyāsaḥ**

ōṃ ōṃ dakṣiṇatarjanyāṃ namaḥ ।

ōṃ naṃ dakṣiṇamadhyamāyāṃ namaḥ ।

ōṃ mōṃ dakṣiṇānāmikāyāṃ namaḥ ।

ōṃ bhaṃ dakṣiṇakaniṣṭhikāyāṃ namaḥ ।

ōṃ gaṃ vāmakaniṣṭhikāyāṃ namaḥ ।

ōṃ vaṃ vāmānikāyāṃ namaḥ ।

ōṃ tēṃ vāmamadhyamāyāṃ namaḥ ।

ōṃ vāṃ vāmatarjanyāṃ namaḥ ।

ōṃ suṃ dakṣiṇāṅguṣṭhōrdhvaparvaṇi namaḥ ।

ōṃ dēṃ dakṣiṇāṅguṣṭhādhaḥ parvaṇi namaḥ ।

ōṃ vāṃ vāmāṅguṣṭhōrdhvaparvaṇi namaḥ ।

ōṃ yaṃ vāmāṅguṣṭhādhaḥ parvaṇi namaḥ ।

**Viṣṇuṣaḍakṣaranyāsaḥ**

ōṃ ōṃ hṛdayē namaḥ ।

ōṃ viṃ mūrdhnai namaḥ ।

ōṃ ṣaṃ bhrurvōrmadhyē namaḥ ।

ōṃ ṇaṃ śikhāyāṃ namaḥ ।

ōṃ vēṃ nētrayōḥ namaḥ ।

ōṃ naṃ sarvasandhiṣu namaḥ ।

ōṃ maḥ prāchyāṃ astrāya phaṭ ।

ōṃ maḥ āgnēyyāṃ astrāya phaṭ ।

ōṃ maḥ dakṣiṇasyāṃ astrāya phaṭ ।

ōṃ maḥ nairṭyē astrāya phaṭ ।

ōṃ maḥ pratīchyāṃ astrāya phaṭ ।

ōṃ maḥ vāyavyē astrāya phaṭ ।

ōṃ maḥ udīchyāṃ astrāya phaṭ ।
ōṃ maḥ aiśānyāṃ astrāya phaṭ ।
ōṃ maḥ ūrdhvāyāṃ astrāya phaṭ ।
ōṃ maḥ adharāyāṃ astrāya phaṭ ।

**Srī Hari**

**Atha Srīnārāyaṇakavacha**

**॥Rājōvācha॥**
yayā guptaḥ sahastrākṣaḥ savāhān ripusainikān।
krīḍanniva vinirjitya trilōkyā bubhujē śriyam॥1॥

bhagavaṃstanmamākhyāhi varma nārāyaṇātmakam।
yathāsstatāyinaḥ śatrūn yēna guptōsjayanmṛdhē॥2॥

**॥Srīśuka Uvācha॥**
vṛtaḥ purōhitōstvāṣṭrō mahēndrāyānupṛchChatē।
nārāyaṇākhyaṃ varmāha tadihaikamanāḥ śṛṇu॥3॥

viśvarūpa uvāchadhautāṅghripāṇirāchamya sapavitra udaṅ mukhaḥ।
kṛtasvāṅgakaranyāsō mantrābhyāṃ vāgyataḥ śuchiḥ॥4॥

nārāyaṇamayaṃ varma sannahyēd bhaya āgatē।
pādayōrjānunōrūrvōrūdarē hṛdyathōrasi॥5॥

mukhē śirasyānupūrvyādōṅkārādīni vinyasēt।
ōṃ namō nārāyaṇāyēti viparyayamathāpi vā॥6॥

karanyāsaṃ tataḥ kuryād dvādaśākṣaravidyayā।
praṇavādiyakārantamaṅgulyaṅguṣṭhaparvasu॥7॥

nyasēd hṛdaya ōṅkāraṃ vikāramanu mūrdhani ।
ṣakāraṃ tu bhruvōrmadhyē ṇakāraṃ śikhayā diśēt ॥8॥

vēkāraṃ nētrayōryuñjyānnakāraṃ sarvasandhiṣu ।
makāramastramuddiśya mantramūrtirbhavēd budhaḥ ॥9॥

savisargaṃ phaḍantaṃ tat sarvadikṣu vinirdiśēt ।
ōṃ viṣṇavē nama iti ॥10॥

ātmānaṃ paramaṃ dhyāyēda dhyēyaṃ ṣaṭśaktibhiryutam ।
vidyātējastapōmūrtimimaṃ mantramudāharēta ॥11॥

ōṃ harirvidadhyānmama sarvarakṣāṃ nyastāṅghripadmaḥ patagēndrapṛṣṭhē ।
darāricharmāsigadēṣuchāpāśān dadhānōssṭaguṇōssṭabāhuḥ ॥12॥

jalēṣu māṃ rakṣatu matsyamūrtiryādōgaṇēbhyō varūṇasya pāśāt ।
sthalēṣu māyāvaṭuvāmanōsvyāt trivikramaḥ khē'vatu viśvarūpaḥ ॥13॥

durgēṣvaṭavyājimukhādiṣu prabhuḥ pāyānnṛsiṃhō'surayuthapāriḥ ।
vimuñchatō yasya mahāṭṭahāsaṃ diśō vinēdurnyapataṃścha garbhāḥ ॥14॥

rakṣatvasau mādhvani yajñakalpaḥ svadaṃṣṭrayōnnītadharō varāhaḥ ।
rāmō'drikūṭēṣvatha vipravāsē salakṣmaṇōsvyād bharatāgrajōssmān ॥15॥

māmugradharmādakhilāt pramādānnārāyaṇaḥ pātu naraścha hāsāt ।
dattastvayōgādatha yōganāthaḥ pāyād guṇēśaḥ kapilaḥ karmabandhāt ॥16॥

sanatkumārō vatu kāmadēvāddhayaśīrṣā māṃ pathi dēvahēlanāt ।
dēvarṣivaryaḥ purūṣārchanāntarāt kūrmō harirmāṃ nirayādaśēṣāt ॥17॥

dhanvantarirbhagavān pātvapathyād dvandvād bhayādṛṣabhō nirjitātmā ।
yajñaścha lōkādavatājjanāntād balō gaṇāt krōdhavaśādahīndraḥ ॥18॥

dvaipāyanō bhagavānaprabōdhād buddhastu pākhaṇḍagaṇāt pramādāt |
kalkiḥ kalē kālamalāt prapātu dharmāvanāyōrūkṛtāvatāraḥ ||19||

māṃ kēśavō gadayā prātaravyād gōvinda āsaṅgavamāttavēṇuḥ |
nārāyaṇa prāhṇa udāttaśaktirmadhyandinē viṣṇurarīndrapāṇiḥ ||20||

dēvōsparāhṇē madhuhōgradhanvā sāyaṃ tridhāmāvatu mādhavō mām |
dōṣē hṛṣīkēśa utārdharātrē niśītha ēkōsvatu padmanābhaḥ ||21||

śrīvatsadhāmāpararātra īśaḥ pratyūṣa īśō'sidharō janārdanaḥ |
dāmōdarō'vyādanusandhyaṃ prabhātē viśvēśvarō bhagavān kālamūrtiḥ ||22||

chakraṃ yugāntānalatigmanēmi bhramat samantād bhagavatprayuktam |
dandagdhi dandagdhyarisainyamāsu kakṣaṃ yathā vātasakhō hutāśaḥ ||23||

gadē'śanisparśanavisphuliṅgē niṣpiṇḍhi niṣpiṇḍhyajitapriyāsi |
kūṣmāṇḍavaināyakayakṣarakṣōbhūtagrahāṃśchūrṇaya chūrṇayārīn ||24||

tvaṃ yātudhānapramathaprētamātṛpiśāchavipragrahaghōradṛṣṭīn |
darēndra vidrāvaya kṛṣṇapūritō bhīmasvanō'rērhṛdayāni kampayan ||25||

tvaṃ tigmadhārāsivarārisainyamīśaprayuktō mama Chindhi Chindhi |
charmañChatachandra Chādaya dviṣāmaghōnāṃ hara pāpachakṣuṣām ||26||

yannō bhayaṃ grahēbhyō bhūt kētubhyō nṛbhya ēva cha |
sarīsṛpēbhyō daṃṣṭribhyō bhūtēbhyōṃ'hōbhya ēva vā ||27||

sarvāṇyētāni bhagannāmarūpāstrakīrtanāt |
prayāntu saṅkṣayaṃ sadyō yē naḥ śrēyaḥ pratīpakāḥ ||28||

garūḍxō bhagavān stōtrastōbhaśChandōmayaḥ prabhuḥ |
rakṣatvaśēṣakṛchChrēbhyō viṣvaksēnaḥ svanāmabhiḥ ||29||

sarvāpadbhyō harērnāmarūpayānāyudhāni naḥ |
buddhindriyamanaḥ prāṇān pāntu pārṣadabhūṣaṇāḥ ||30||

yathā hi bhagavānēva vastutaḥ sadsachcha yat |
satyanānēna naḥ sarvē yāntu nāśamupādravāḥ ||31||

yathaikātmyānubhāvānāṃ vikalparahitaḥ svayam |
bhūṣaṇāyuddhaliṅgākhyā dhattē śaktīḥ svamāyayā ||32||

tēnaiva satyamānēna sarvajñō bhagavān hariḥ |
pātu sarvaiḥ svarūpairnaḥ sadā sarvatra sarvagaḥ ||33

vidikṣu dikṣūrdhvamadhaḥ samantādantarbahirbhagavān nārasiṃhaḥ |
prahāpaya~ṃllōkabhayaṃ svanēna grastasamastatējāḥ ||34||

maghavannidamākhyātaṃ varma nārayaṇātmakam |
vijēṣyasyañjasā yēna daṃśitō'surayūthapān ||35||

ētad dhārayamāṇastu yaṃ yaṃ paśyati chakṣuṣā |
padā vā saṃspṛśēt sadyaḥ sādhvasāt sa vimuchyatē ||36||

na kutaśchita bhayaṃ tasya vidyāṃ dhārayatō bhavēt |
rājadasyugrahādibhyō vyāghrādibhyaścha karhichit ||37||

imāṃ vidyāṃ purā kaśchit kauśikō dhārayan dvijaḥ |
yōgadhāraṇayā svāṅgaṃ jahau sa marūdhanvani ||38||

tasyōpari vimānēna gandharvapatirēkadā |
yayau chitrarathaḥ strīrbhivṛtō yatra dvijakṣayaḥ ||39||

gaganānnyapatat sadyaḥ savimānō hyavāk śirāḥ ।
sa vālakhilyavachanādasthīnyādāya vismitaḥ ।
prāsya prāchīsarasvatyāṃ snātvā dhāma svamanvagāt ॥40॥

**॥Srīśuka Uvācha॥**
ya idaṃ śṛṇuyāt kālē yō dhārayati chādṛtaḥ ।
taṃ namasyanti bhūtāni muchyatē sarvatō bhayāt ॥41॥

ētāṃ vidyāmadhigatō viśvarūpāchChatakratuḥ ।
trailōkyalakṣmīṃ bubhujē vinirjitya'mṛdhēsurān ॥42॥

**॥iti śrīnārāyaṇakavachaṃ sampūrṇam॥**
**( śrīmadbhāgavata skandha 6)**